कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ चतुर्थ काण्डे पञ्चमः प्रश्नः॥

हरिः ओम्॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥ या त इषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तनुवा शंतमया गिरिशन्ताऽभि चाकशीहि॥ यामिषुं गिरिशन्त हस्ते [१] बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत्॥ शिवेन वचसा त्वा गिरिशाऽच्छा वदामसि। यथा नः सर्वमिज्जगदयक्ष्मग्ं सुमना असत्॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीग्श्च सर्वाञ्जंभयन्थ्सर्वाश्च यातुधान्यः॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः। ये चेमाग्ं रुद्रा अभितो दिक्षु [२] श्रिताः सहस्रशोऽवैषाग्ं हेड ईमहे॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृश्नन्नदृश्नुदहार्यः। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः॥ नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥ प्र मुञ्च धन्वनस्त्वमुभयोरार्न्नियोर्ज्याम्। याश्च ते हस्त इषवः [३] परा ता भगवो वप॥ अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत। अनेशन्नस्येषव आभुरस्य निषङ्गथिः॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परि ब्भुज॥ नमस्ते अस्त्वायुधायाऽनाततताय धृष्णवे। उभाभ्यामुत

ते नमो बाहुभ्यां तव धन्वने॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवाऽऽरे अस्मन्नि धेहि तम्॥[४]

*हस्ते दिक्ष्विषव उभाभ्यां द्वाविग्ं शतिश्च॥**4.5.1**॥*

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाऽऽतताविने क्षेत्राणां पतये नमो नमः सूतायाऽहन्त्याय वनानां पतये नमो नमो [५] रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाऽऽक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः॥[६]

*वनानां पतये नमो नम एकान्न त्रिग्ं शच्च॥**4.5.2**॥*

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायाऽरण्यानां पतये नमो नमः सृकाविभ्यो जिघाग्ं सद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम [७] इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम

आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः॥[८]

कुलुञ्चानां पतये नमो नमोऽश्वपतिभ्यस्त्रीणि च॥4.5.3॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृग्ंहतीभ्यश्च वो नमो नमो गृथ्सेभ्यो गृथ्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो [९] रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः॥[१०]

रथेभ्यः श्वपतिभ्यश्च द्वे च॥4.5.4॥

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च

वामनाय च नमो बृहते च वर्ष्षीयसे च नमो वृद्धाय च संवृध्वने च [११] नमो अग्रियाय च प्रथमाय च नम आशवे चाऽजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चाऽवस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च॥[१२]

संवृद्ध्वने च पञ्चविग्ंशतिश्च॥4.5.5॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चाऽपरजाय च नमो मध्यमाय चाऽपगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चाऽवसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च [१३] नम आशुषेणाय चाऽऽशुरथाय च नमः शूराय चाऽवभिन्दते च नमो वर्म्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च॥[१४]

प्रतिश्रवाय च पञ्चविग्ंशतिश्च॥4.5.6॥

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चाऽऽयुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च [१५] नमः कूप्याय चाऽवट्याय च नमो वर्ष्याय चाऽवर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च॥[१६]

वैशन्ताय च त्रिग्ं शच्च॥4.5.7॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चाऽरुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च [१७] नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चाऽवार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च॥[१८]

शिवतराय च त्रिग्ं शच्च॥4.5.8॥

नम इरिण्याय च प्रपथ्याय च नमः किग्ंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाग्ंसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च [१९] नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाऽभिघ्नते च नम आक्खिदते च प्रक्खिदते च नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः॥[२०]

उलप्याय च त्रयस्त्रिग्ंशच्च॥4.5.9॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्माऽरोमो

एषांकिंचनाऽऽममत्॥ या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥ इमाग्ं रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्। यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि- [२१] न्ननातुरम्॥ मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो [२२] रुद्र रीरिषः॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥ आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः॥ स्तुहि [२३] श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्। मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः॥ परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥ मीढुष्टम शिवतम शिवो नः सुमना भव। परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं [२४] बिभ्रदा गहि॥ विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्रग्ं हेतयोऽन्यमस्मन्नि वपन्तु ताः॥ सहस्राणि सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि॥[२५]

अस्मिग्ग् स्तनुवः स्तुहि पिनाकमेकान्न त्रिग्ंशच्च॥4.5.10॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषाग्ं सहस्रयोजनेऽव धन्वानि तन्मसि॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। नीलग्रीवाः शितिकण्ठाः शर्वा अधः

क्षमाचराः॥ नीलग्रीवाः शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः। ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः। ये भूतानामधिपतयो विशिखासः कपर्दिनः। ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्। ये पथां पथिरक्षय ऐलबृदा यव्युधः। ये तीर्थानि [२६] प्रचरन्ति सृकावन्तो निषङ्गिणः। य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे। तेषाग्ं सहस्रयोजनेऽव धन्वानि तन्मसि॥ नमो रुद्रेभ्यो ये पृथिव्यां ये ऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ [२७]

*तीर्थानि यश्च षट्च॥**4.5.11**॥*

*नमस्ते रुद्र नमो हिरण्यबाहवे नमः सहमानाय नम आव्याधिनीभ्यो नमो भवाय नमो ज्येष्ठाय नमो दुन्दुभ्याय नमः सोमाय नम इरिण्याय द्रापे सहस्रण्येकादश॥**11**॥*

*नमस्ते रुद्र नमो भवाय द्रापो सप्तविग्ंशतिः॥**27**॥*

नमस्ते रुद्र तं वो जंभे दधामि॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति चतुर्थ काण्डे पञ्चम प्रश्नः॥